समय: होरात्रयम्　　　　SAMPLE QUESTION PAPER-- S A- 2

# संस्कृतम्

## कक्षा 10

पूर्णाङ्कः-90

प्रश्नपत्रे चत्वार: खण्डा: सन्ति

खण्ड:[क] अपठित---अवबोधनम् 15 अङ्का:

खण्ड:[ख] रचनात्मकं कार्यम् 15 अङ्काः

खण्ड:[ग] अनुप्रयुक्तम् व्याकरणम् 30 अङ्काः

खण्ड:[घ] पठित-अवबोधनम् 30 अङ्काः

सर्वे प्रश्नाः अनिवार्याः,प्रश्नसंख्या अवश्यम् लेखनीया

## खंड: क

## अपठित अवबोधनम्

**प्रश्नानां उत्तराणि खण्डानुसारम्,संस्कृतभाषायामेवलेखनीयानि**

1 अधोलिखितम् अनुच्छेदम् पठित्वा तदाधरितान् प्रश्नान् उत्तरत 10

मानव: जीवने सुखं वाञ्छति.। सुखं कुत: वा प्राप्यते ?अद्यत्वे धनमेव सर्वस्वं जातं, धनविहीन: पशुसम: इत्येव भावना प्रबला जाता। परन्तु धनिका: अधिकाधिकम् धनं इच्छन्ति,दुखिन: च भवन्ति संतोषस्य, दुखस्य वा हेतु: मन: भवति । यदि मन: प्रसन्नं भवति तदा सुखं भवति। मन: संतोषेण प्रसन्नं भवति । संतोष: प्राप्यते त्यागत:, परोपकारत: च । मनसि च परितुष्टे जीवनम् भवति सुखमयम् आनंदपूर्णम् च ।

**। एकपदेन उत्तरत।** 1x2=2

१ संतोषस्य हेतु: कि?

२ सन्तोष: कस्मात् प्राप्यते?

**II पूर्णवाक्येन उत्तरत ।** **1x2=2**

१ मनसि परितुष्टे जीवनं कीदृशम् भवति ?

२ अद्यत्वे कीदृशी भावना प्रबला जाता ?

**III निर्देशानुसारम् उत्तराणि लिखत** **1x4=4**

१] 'यदि मन: प्रसन्नं' अत्र 'प्रसन्नं' इति कस्य विशेषणं ?

अ. ] संतोषस्य [आ]. त्यागस्य

[इ] मनस: [ई] परोपकारस्य

२] 'अन्येषाम् उपकारात् "इति स्थाने किम् पदम् अत्र प्रयुक्तं ?

[अ] त्यागत: [आ]. परोपकारत: [इ.] संतोष: [ई]. प्रवर्ति

३] मानव: जीवने सुखं वाञ्छति- अत्र वाञ्छति इति क्रियापदस्य कतृपदं किम्?

[अ] मानव: [आ.] जीवने [ इ] सुखं [ ई]. न कोऽपि

४] संतुष्टे" इत्यर्थे प्रयुक्तं पदं गद्यभागात् चित्वा लिखत ।

**IV ] अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत** **2**

**2 शलोकांशान् पठित्वाप्रश्नान् उत्तरत**

विद्या ददाति विनयम् विनायात् याति पात्रताम् ।

पात्रत्वात् धनं आप्नोति धनात् धर्मं ततः सुखम्॥

I एकपदेन उत्तरत 1x1=1

१ विद्या किम् ददाति?

II पूर्णवाक्येन उत्तरत 1x2=2

१ विनयात् कां याति?

२ धनं कस्मात् आप्नोति?

III निर्देशानुसारम् उत्तरत 1x2=2

१] दु:ख़म् इत्यस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

[अ] धर्मं , [आ} सुखम्, {इ} याति

२] "विनम्रता' इत्यर्थे प्रयुक्तं पदं किम्?

[अ] विनयम्, [आ} याति, {इ] तत:

## खंड: ख---रचनात्मकम् कार्यम्-------15

3 भवान् प्रियव्रत:भगिन्या: शान्त्या: विवाहस्य निमंत्रणपत्रं उचितपदै: पूरयित्वा लिखत I 1/2x10=5

गुरुग्राम:

9—11—2013

प्रियमित्र राहुल,

-----------१

अत्र कुशलं तत्रास्तु. इदं प्रीतिदायकं वृत्तं --------२ सूचयित्वा अहम् अतीव आनन्दम् अनुभवामि यत् मम----------३ शान्त्या: विवाह: अग्रिम मासस्य दशम्याम् ------------४ बुधवासरौ निश्चित:। ----------------५ सुधापुरात् आगमिष्यति । अहम् प्रेमपूर्वकम् -------------६,येन त्वं अत्र पित्रृभ्याम् सह पूर्वत: एव प्राप्त: स्या:। भवतां स्निग्धाम् -------------७ , सहाय्यम् च अहम् कामये । -------------८ नमोनम:.---------९ प्रतीक्षमाणः ,

भवदीय: ----------१०

[भवन्तं,पत्रोत्तरं,वरयात्रा,प्रियव्रत:,सम्गतिम्,पितृभ्याम्,सप्रेम नम:, ज्ञापयामि,भगिन्या:,तारिकायाम् ]

4 अधोदत्तम् चित्रं दृष्ट्वा मंजुषायाम् प्रदत्तशब्दानाम् सहायतया 2x5=10

पंचसंस्कृतवाक्यानि लिखत

[चौर,प्रहरिणः,त्रय: रज्जुना, दुष्कर्म , न्यायालयं ,अनेकानि,जना:, आवृता:]



अथवा

'मम विद्यालयस्य वार्षिकोत्सव': इति विषयम् अधिकृत्य संस्कृते पंचवाक्यानि रचयत

[प्रधानाचार्य:,कार्यक्रमा: नृत्यनाटिका, मुख्यातिथि:, शिक्षामंत्री,स्वागतगानम्, वार्षिकोत्सवः]

# खण्ड: ग

# अनुप्रयुक्त व्याकरणम् -30

**5 अधोलिखितवाक्येषु रेखांकितपदानाम् सन्धिकार्यम् लिखत**

**1x4=4**

[१] ग्रामेऽस्मिन् कृषका: वसन्ति

२] स चेन्निरर्थकम् नीत :।

[३] शीतळे जले शिशु: + स्नाति ।

[४] षट् + एते ऋतव:।

**6 अधोलिखितावाक्येषु रेखांकितपदानाम् समासकार्यम् कुरुत 1x5=5**

१ हरि: हर: च आगच्छत:।

[अ] हरिहरौ [आ] हरिहरे [इ] हरिहरा: [ई] हरिहरम्

२] राम: दश आनानानि यस्य तं अमरायत् ।

[अ] दशननः [आ] दशानन; [इ] दशाननम् [ई] दशाननानि

३ स: साश्चर्यं पश्यति ।

अ] आश्चर्येण सह [आ] आश्चरयात् सह [इ] आश्चर्यस्य सह

ई] आश्चर्यं सह

४] एषः बालक: बालकस्य पश्चात् धावति ।

[अ] अनुबालक:, [आ] अनुबालकम् [इ] बालक पश्चात् [ई] अनुबालकात्

५] मम सखी चन्द्र इव मुखं यस्या: सा अस्ति ।

अ] चन्द्रमुखः [आ] चन्द्रमुख़म् [इ] चन्द्रमुखी [ई]] चन्द्रमुखाम्

**7 ] प्रकृतिप्रत्ययविभाजनम् कृत्वा प्रदत्तविकल्पेभ्यः उचितं उत्तरं चित्वा लिखत**

**1x5=5**

१] नारी सर्वैः पूज्या अस्ति ।

[अ} नर+इन् [आ} नारी+ङीप [इ] नर+ ङीप् [ई} नर+टाप्

२] सा मम कनिष्ठ+ टाप् भगिनी अस्ति ।

[अ] कनिष्ठा [आ] कनिष्ठं [इ] कनिष्ठाः [ई] कनिष्ठी

३] किम् उक्तवती भवती ?

[अ]भव+ङीप् [आ] भवत् + ङीप् [इ] भव+टाप् [ई} भवा+ईप्

४] प्रकृतेः सुंदरता हृद्या ।

[अ] सुन्दर+तळ् [आ] सुन्दरा+ताळ् [इ] सुन्दर+टाप् [ई] सुन्दर+त्व

५] यः सप्तराज्येषु विभासमानः ।

[अ] विभास्+मान् [आ] वि+भास्+शानच् [इ] वि+भास्+शतृ [ई]]विभास्+कत

**8 अव्ययपदैः पूरयत ।** **1x5=5**

१]ते ---------गच्छन्ति?

[अ] यदि [आ] कुत्र [इ] हयः [ई] श्वः

२] ----------गुरुवासरः आसीत्।

[अ]अद्य [आ] अधुना [इ] हयः [ई] कुत्र

३] विद्यालयात्-----------उद्यानं अस्ति ।

[अ]तदा [आ] कुतः [इ] बहिः [ई]यत्र

४] --------- गणितस्य कालांशः अस्ति ।

[अ]सम्प्रति [आ] यदा [इ] कुत्र [ई] तर्हि

५] यत्र धूम:---------------अग्नि: ।

अ]तदा [आ] तत्र [इ] एव [ई] यदा

**9 उचितसंख्यापदेन पूरयत ।** **1x5=5**

१] [2] ------------जनौ तत्र आलपतः।

२] पाण्डवा: ------------ [5] आसन्

३] वर्षे-----------[12] मासा: सन्ति।

४]------------वने एक: सिंह: अस्ति।

[अ] एके [आ] एकस्मिन् [इ] एके [ई] एकं

५] तत्र-----------[2] बालिके तिष्ठतः

**10] अशुद्धपदानाम् संशोधनं कृत्वा पुनःलिखत ।** **1x6=6**

१] माम् एष: विषय: अति रोचते।

[अ] मम [आ] मयि [इ] मह्यं [ई] मत्

२] मम मित्र: मोहन: अस्ति ।

[अ] मित्रं [आ] मित्राणि [इ] मित्रा [ई] मित्रे

३] भवान् किम् लिखसि ?

[अ] लिखति [आ] लिखामि [इ] अलिखाम [ई] लिखथ

४] तत्र अनेका: सिंहा: आसन् ।

[अ] अनेके [आ] अनेकं [इ] अनेको [ई] अनेकः

५] वानराः कूर्दति।

[अ] अकूर्दत् [आ] अकूर्दः [इ] अकूर्दन् [ई] अकूर्दन्ताम्

६ विद्वान् सर्वत्र पूज्यन्ते

[अ] पूज्यते, [आ] पूज्यति ,[इ] पूजयंती ,[ई] पूजन्ते

## खण्डः घ

## पठित-अवबोधनम्-- 30

**11. अधोलिखितं गद्यांशं, पदयांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत-**

**(अ) गद्यांशः** **4**

गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत् - 'आर्य! किं सर्वगतं कुशलं वर्तते? अयथाकालं समागतोऽसि?' संप्रति धर्ममतिः सः पश्चात्तापेन दगधमानसः सर्वं वृत्तान्तं निवेद्य सकरुणम् उच्चैः अक्रन्दत्। बुद्धिमती सा अवदत् - 'अहं चिन्तयामि, आपदां तरणिः धैर्यम्। इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम्'।

प्रश्नाः

**1 एकपदेन उत्तरत -** **[1x1=1]**

(1) विषादं त्यक्त्वा कः कर्तव्यः?

**2 पूर्णवाक्येन उत्तरत -** **[1x1=1]**

(1) पश्चात्तापेन दग्धमानसः सः (प्रच्छन्नभाग्यः) किं निवेद्य उच्चैः अक्रन्दत्?

**3 विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत -** **[1X2=2]**

(1) 'शीघ्रम्' इति अर्थे अस्मिन् अनुच्छेदे किम पदं प्रयुक्तम्?

(क) इदानीम् (ख) सम्प्रति

(ग) सपदि (घ) अयथाकालम्

(2) 'भार्या' इति कर्तृपदस्य क्रियापदं किम्?

(क) असि (ग) क्रियताम्

(ख) वर्तते (घ) अपृच्छत्

**(आ) पद्याशः**

**4**

आचारः प्रथमो धर्मः इत्येदत् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

प्रश्नाः

**1 एकपदेन उत्तरत -** **[1x1=1]**

(1) प्राणेभ्योऽपि विशेषतः कः रक्षणीयः?

**2 पूर्णवाक्येन उत्तरत -**

**1x1=1**

प्रथमः धर्मः कः?

**3 उचितम् उत्तरं चित्वा लिखत** **1x2=2**

(1) 'धर्मः' इति पदस्य विशेषणपदं किम्?

(क) आचारः (ख) वचः

(ग) विशेषतः (घ) प्रथमः

(2) 'अतः' इति अर्थे अत्र किं पदं प्रयुक्तम्?

(क) तस्मात् (ख) इति

(ग) एतत् (घ) अपि

**(इ) नाट्यांशः** - **4**

(ततः प्रविशतः व्यासनारदौ)

नारदः - (व्यासं प्रति) पश्यतु भवान्! कोऽयम् अनर्थः क्रियते एताभ्यां वीराभ्याम्। समन्तात् प्रचण्डानलशिखाः आकाशं लिहन्ति इव। गगनात् सहस्रशः उल्काः भूमौ पतन्ति। कम्पते खलु सपर्वत-वन-द्रुमा सकला मही। पवनः स्तब्धः जातः।सहस्रांशुः न भासते। शैलाः विदीर्यन्ते। कथमपि एतौ निवारणीयौ, अन्यथा सकलं जगद् ध्वस्तं भविष्यति।

व्यासनारदौ - भो वीरौ! संहरतम् संहरतम् निजास्त्रे।

प्रश्नाः

**1 एकपदेन उत्तरत -** **1x1=1**

कः स्तब्धः जातः?

**2 पूर्णवाक्येन उत्तरत -** **1x1=1**

गगनात् सहस्रशः उल्काः कुत्र पतन्ति?

**3 विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत -**

**[1X2=2]**

(1) 'सकलम्' इति विशेषणपदस्य विशेष्यपदम् किम्?

(क) मही (ख) जगत्

(ग) शैलाः (घ) आकाशम्

(2) 'समन्तात्' प्रचण्डानलशिखाः आकाशं लिहन्ति इव इति वाक्ये 'लिहन्ति' क्रियापदस्य कर्तृपदं किम्?

(क) प्रचण्डानलशिखाः (ख) आकाशम्

(ग) समन्तात् (घ) इव

**12. अधोलिखितयोः कथनयोः समुचितं भावं विकल्पेभ्यः चित्वा लिखत - [1X2=2]**

(क) 'नीरक्षीरविवेके तु हंसो हंसः बको बकः'।

भावः -

१ बकः च समानौ,तत्र कोऽपि भेदः नास्ति।

२ हंसः हंसः क्षीरं पिबति बकः नीर-क्षीरं च पिबति, अतः तत्र भेदः।

३ 'दुग्धस्य जलस्य च मध्ये किं दुग्धं किं च जलम्' इति विवेकपूर्णकार्ये एव हंसस्य बकस्य च भेद: दृश्यते।

(ख) 'सततं' चक्रवत् परिवर्तमानः -

भावः -

(1) कालः यदा -कदा चक्रवत् भ्रमति।

(2) संसारे भ्रमन् कालः चक्रम् एव अस्ति।

(3) कालः चक्रम् इव निरन्तं गतिशीलः अस्ति

**13 मञ्जुषातः उचितम्पदं चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत- 4**

(क) यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः।
कर्तुं शक्यो भवेद्येन स विवेक इतीरितः।।

अन्वयः

येन(1)........... अपि यत् प्रोक्तं तस्य(2) .........येन कर्तुं (3)................. भवेत्, सः (4) ...............इति ईरितः।

ख]अधुना रमणीया हि सृष्टिरेषा जगतपते:।
जीवासर्वेत्र मोदन्ताम् भावयन्त: परसपरम ।।

जगत्पते: एषा----------[1] हि अधुना-----------[2] सर्वे -------[3] अत्र परसपरम्--------[4] मोदन्ताम्।

[रमणीया,भवायन्त:,तत्वार्थनिर्णय:, सृष्टि:,जीवा:,केन,विवेक,शक्य:]

**14। रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणम् कुरुत**

**1x5=5**

1] अर्थस्य निर्णय: विवेकेन कर्तुम् शक्यते।

2] चतुर्दशमन्वन्तराणां समूहः कल्पः।

3] अरुणस्य प्रदेशः अरुणाचलः।

4] जलबिन्दुनिपातेन क्रमशः घटः पूर्यते।

5] धैर्यवान् लोके परिभवं न प्राप्नोति।

**15 अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत - [1/2X8=4]**

[1 ] 'पक्षिणां राजा कः' इति विचिन्त्य तत्र विवादः भवति।

[2] प्रकृतिमातु: आज्ञया ते मिलित्वा निवसन्ति आनन्देन च नृत्यन्ति।

[3] तयोः मध्ये विवादः भवति।

[4] सर्वे स्वप्रशंसां कुर्वन्ति।

[5] सः काकं कटुवचनानि कथयति।

[6]तदैव अन्ये अनेके पक्षिणः अपि तत्र प्रविशन्ति।

[7]एकदा राजहंसः काकस्य ध्वनिं श्रुत्वा कुपितः भवति ।

[8] काक: अपि कुपित: भवति ।

**16 रेखाङ्गितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत - [1X3=3]**

(1) साधु पृष्टम्! अत्र अनेके प्रमुखोत्सवाः।

(क) उचितम् (ख) साधुः (ग) श्रेष्ठः जनः (घ) सज्जनः

(2) पुष्पाणां समृद्धिः मनोहरः।

(क) ऐश्वर्यम् (ख) धनम् (ग) बाहुल्यम् (घ) सौन्दर्यम्

(3) न जानाति भवान् द्रौणेः चपलां प्रकृतिम्।

(क) स्वभावम् (ख) मूलम् (ग) धातुम् (घ) शब्दम्

**ANSWER KEY**

खण्डः  क   पूर्णाङ्कः–90   I एकपदेन उत्तरत

1] मनः, 2] त्यागतः,परोपकारतः

II एकवाक्येन उत्तरत

१ मनसि परितुष्टे जीवनं सुखमयम्,आनंदपूर्ण च ।

२ धनविहीनः पशुसमः इति भावनाप्रबला जा ता।

III निर्देशानुसारम् उत्तरत

१मनसः  २ परोपकारतः ३ मानवः४ परितुष्टे

IV उचितम् एकं शीर्षकम् लिखत

2] श्ळोकात् प्रश्नोत्तराणि।

१] एकपदेन उत्तरत।  विनयं

२] एकवाक्येन उत्तरत

अ] विनयात् पात्रताम् याति । आ] पात्रत्वात् धनं अप्नोति ।

३] शुद्धंउत्तरं लिखत । अ]सुखम् ।  आ]विनयं ।

खण्डः–ख

3] पत्रपूरणम्।

[१] सप्रेम नमः,[२] भवन्तं,[ ३] भगिन्याः ,[४] तारिकायाम् ,[५] वरयात्रा, [६] ज्ञापयामि, [७] संगतिम् , [८] पित्रुभ्याम् , [९] पत्रोत्तरम् , [१०] प्रियव्रतः

4 व्याकरणशुद्धं अर्थायुकतम् पंचवाक्यानि।

खण्डः  ग

5] संधिकार्यम् कुरुत।

१]ग्रामे+अस्मिन् २] चेत्+निरर्थकं ३] शिशुस्नाति ४]षडेते

6 समासकार्यम् कुरुत।

१]हरिहरौ २]दशाननं ३]आश्चर्येण सह ४] अनुबलाकम् ५] चन्द्रमुखी

7 प्रत्ययकार्यम् कुरुत।

१]नर+ङीप् २]कनिष्ठा ३]भावत्+ङीप् ४]सुंदर+तल् ५] वि+भास्+शानच्

8 अव्ययपूरणम् कुरुत।

१] कुत्र २]ह्यः ३] बहि: ४]सम्प्रति ५]तत्र

9 संख्याशब्दपूरणं कुरुत।

१]द्वौ २]पंच ३]द्वादश ४] एकस्मिन् ५]द्वे

10 शुद्धं कुरुत

१] मह्यं २] मित्रं ३] लिखति ४] अनेके ५] कूर्दन्ति५] पूज्यते

खंड: घ

11.गद्याम्शात् प्रश्नोत्ताराणि---एकपदेन उत्तरत।

१] उद्यम:

२]एकवाक्येन उत्तरत।

१]स सर्वं वृत्तान्तम् निवेद्य उचै: अक्रंदत्

३]निर्देशानुसारम् उत्तरत

१]सपदि २]अपृचछत्

आ]श्ळोकांशात् प्रश्नोत्तराणिलिखत।

१]एकपदेन उत्तरत।

सदाचारम्

२]एकवाक्येन उत्तरत।

आचारः प्रथमो धर्मः।

३]निर्देशानुसारम् उत्तरत।

१]प्रथमः  २] तस्मात्

इ] नाट्यांशः

१]एकपदेन उत्तरत।

पवनः

२]एकवाक्येन उत्तरत।

सहस्रशः उल्काः भूमौ पतति ।

३निर्देशानुसारम् उत्तरत।

१] मही २]प्रचण्डानिलशिखाः

12]भावपूरणम्।

१]दुग्धस्य,जलस्य च-------------

२]कालः चक्रम् इव------------

13]अन्वयं पूरयत।

१] केन,तत्वर्थनिर्णयः,शक्यः,विवेकः

२] सृष्टिः,रमणीया,जीवाः,भावयन्तः

14]प्रश्ननिर्माणं कुरुत ।

१]केन २]कति ३] कस्य ४] केन ५]क:

15 घटनाक्रमलेखनम्।

१]एकदाराजहंस:-----------

२]स: काक:------------

३]काक:अपि---------

४]तयो:मद्ध्ये----------

५] तदैव अन्ये----------

६]सर्वे----------------

७]पक्षीणां रजा------------

८]प्रकृति मातु:----------

16 शुद्धं अर्थं चिनुत।

१]उचितम् २] बाहुल्यम् ३]स्वभावम्

# BLUE PRINT

| प्रश्न.सम् | विषय: | प्रश्न प्रकार:<br>खण्ड:-क | प्रश्न संख्या | मुल्यभार:15 |
|---|---|---|---|---|
| 1<br>2 | गद्यांशः<br>सरलं पद्यम् | बहुविकल्पात्मकः<br>लघत्तरात्मक: | 1<br>1 | 10<br>5 |
| 3<br>4 | पत्रपूरणम्<br>चित्रवर्णनम् | खण्ड: ख<br>निबंधात्मकः<br>निबंधात्मक | 1<br>1 | 5<br>10 |
| | | खण्ड: ग | | |
| | संधि | लघूत्तरात्मकः | 1 | 4 |
| 6 | समास: | बहुविकल्पात्मकः | 1 | 5 |
| 7 | प्रत्यया: | बहुविकल्पात्मक: | 1 | 5 |
| 8 | अव्ययपदानि | लघूत्तरात्मकः | 1 | 5 |
| 9 | संख्या | लघूत्तरात्मकः | 1 | 5 |
| 10 | संशोधनकार्यम | बहु.वि. | 1 | 6 |
| | | खण्ड: घ | | |
| 11 | गद्यांशः<br>पद्याम्शः<br>नाट्याम्शः | ब.वि/लघूत्तर<br>.ब.वि/ळघूत्तर<br>ब.वि/ळघूत्तर | 1<br>1<br>1 | 4<br>4<br>4 |
| 12 | भावबोधनम् | बहुविकल्पात्मकः | 1 | 2 |
| 13 | श्ळोकान्वयः | ळघूततरात्मकः | 1 | 4 |
| 14 | प्रश्ननिर्माणम् | लघूत्तरात्मक: | 1 | 5 |
| 15 | कथाक्रम; | निबंधात्मकः | 1 | 4 |
| 16 | शब्दार्थमेळनम | बहुविकल्पात्मकः | 1 | 3 |